# A-I/1/2298/ 21

## द्वितीयसत्रार्द्धम्

## प्रथमपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. प्रमेयकमलमार्त्तण्डस्य माहात्म्यं प्रकटयत ?
2. ब्रह्माद्वैतवादस्य कोऽर्थः ?
3. "सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन" इत्यस्य कोऽर्थः ?
4. विद्याऽविद्ययोः स्वरूपं ब्रह्माद्वैतवादमते कथमङ्गीक्रियते ?
5. ब्रह्माद्वैतवादः केन प्रमाणेन प्रमाणद्विकेन वा साध्यते ?
6. विज्ञानमात्रमेव तत्त्वं के समभ्युपगच्छन्ति ?
7. चित्राद्वैतवादस्य मूलं तत्त्वं किमङ्गीक्रियते ?
8. विज्ञानाऽद्वैतवादचित्राद्वैतवादयोः किमन्तरम् ?
9. शून्याऽद्वैतवादिनः के प्रोक्ताः ?
10. अचेतनज्ञानवादिनः के सन्ति ?
11. बुद्धिमतिस्मृत्यादयः कथं खलु अचेतनत्वं भजन्ते ?

**अथवा**

के खलु साकारज्ञानवादिनः किञ्च तन्मूलं तत्त्वम् ?

12. भूतचैतन्यवादिषु आत्मा कथं खलु स्वीकृतो भवति ?

**अथवा**

भूतचैतन्यवादे के भूताः स्वीकृताः ?

13. ज्ञानस्यास्वसंविदितत्वं कथं केन वा प्ररूपितम् ?

**अथवा**

जैनपरम्परायां कथं वै स्वसंविदितज्ञानं प्रमाणतां भजते ?

14. ज्ञानान्तरवेद्यवाद: कथं केन वा प्ररूप्यते?

**अथवा**

"आत्मा अप्रत्यक्ष: कर्मत्वेनाऽप्रतीयमानत्वात् करणज्ञानवत्" इति केषां मतं किञ्च तदुच्यते?

15. प्रमाणप्रतिमातविषयेऽव्यभिचारित्वं नाम प्रामाण्यं मीमांसकमते कुत: अङ्गीक्रियते स्वत: परतो वा?

**अथवा**

प्रामाण्यविषये जैनानां कोऽभिमत: तदुत्पत्तिज्ञप्तिविषये?

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. "घटमहमात्मना वेद्मि" इति सूत्रं स्पष्टयत।

17. "शब्दानुच्चारणेऽपि स्वस्यानुभवनमर्थवत्" इति सूत्रस्य भावार्थ: लेखनीय:।

18. पूर्वापरपक्षपुरस्सरं शून्यवाद: प्ररूपणीय:।

**अथवा**

विज्ञानाऽद्वैतवाद: सुयुक्तिभि: समीक्षणीय:।

19. "प्रामाण्यं स्वत: परतो वा" इति सूत्रस्य भाव: विशदनीय:।

**अथवा**

साङ्ख्यशास्त्रानुगुणं ज्ञानमचेतनं भवतीति कथम्? समीक्षत।

20. साकारज्ञानवादे स्वीकृतं तत्त्वं प्रमाणनिकषोपरि समीक्षणीयम्।

**अथवा**

"अर्थस्येव तदुन्मुखतया" इत्यस्य भावो विशदनीय:?

**स. दीर्घोत्तरीय: प्रश्न: समाधेय:।** **(1×20=20)**

21. ब्रह्माऽद्वैतवादस्य समीक्षा।

**अथवा**

प्रामाण्यवादस्य दर्शनशास्त्रीयं प्रयोजनम्।

**अथवा**

प्रमेयकमलमार्तण्डनामग्रन्थस्य दार्शनिकमवदानम्।

# A-I/2/2299/21

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. तत्त्वार्थवार्तिकस्य मूलग्रन्थस्य नाम किम्?
2. पठितग्रन्थस्य ग्रन्थकारः कः वर्तते?
3. तत्त्वार्थवार्तिकग्रन्थस्य मङ्गलाचरणं लिखत।
4. जीवस्य कति स्वतत्त्वानि? नामानि लिखत।
5. कषायाः कति सन्ति? नामानि लिखत।
6. 'उपयोगो लक्षणम्' अस्य सूत्रस्य कः अर्थः?
7. मुक्ताः जीवाः के सन्ति? इति लिखत।
8. 'संसारिणस्त्रसस्थावराः' सूत्रस्यार्थं लिखत।
9. वृक्षाणां कानि इन्द्रियाणि भवन्ति?
10. विग्रहगतौ कस्य योगः भवति?
11. शरीराणि कति सन्ति? नामानि लिखत।

**अथवा**

'औपपादिकं वैक्रियिकम्' सूत्रार्थं लिखत।

12. 'सम्यक्त्वचारित्रे' सूत्रार्थं स्पष्टयत।

**अथवा**

'द्रव्यात्मलाभमात्रहेतुकः परिणामः' अस्य वार्तिकस्य कः अर्थः?

13. 'सप्तप्रकृत्युपशमादौपयिकं सम्यक्त्वम्' अस्य वार्तिकस्य अर्थं लिखत।

**अथवा**

'ज्ञानदर्शनावरणक्षयात् केवले क्षायिके' इति वार्तिकं स्पष्टयत।

14. 'अज्ञानं त्रिविधं मत्यज्ञानं श्रुताज्ञानं विभङ्गं चेति' अस्य वार्तिकस्य अर्थं लिखत।

**अथवा**

'कर्मोदयसामान्यापेक्षोऽसिद्धः' वार्तिकस्य कः अर्थः?

15. 'अन्यद्रव्यासाधारणास्त्रयः पारिणामिकाः' इति वार्तिकं स्पष्टयत।

**अथवा**

'सम्यग्दर्शनज्ञानचारित्रपरिणामेन भविष्यतीति भव्यः। वार्तिकस्य कः अर्थः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. जन्म कतिविधं प्रोक्तम्? इति स्पष्टयत।

17. इन्द्रियाणि विशदयत।

18. 'क्षयो निवृत्तिरात्यन्तिकी' वार्तिकं वर्णयत।

**अथवा**

दर्शनोपयोगं ज्ञानोपयोगञ्च वर्णयत।

19. 'मिश्रशब्देनाक्षिपतत्वाच्च' इति वार्तिकं वर्णयत।

**अथवा**

स्थावरजीवानां वर्णनं कुरुत।

20. औदारिकादिशरीराणि पठितग्रन्थदिशा वर्णयत।

**अथवा**

'आहारादिसंज्ञेति चेत्' न; 'अनिष्टत्वात्' इति वार्तिकं स्पष्टयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. जीवस्य भेद-प्रभेदान् पठितग्रन्थदिशा विशादयत।

**अथवा**

अकलङ्काचार्यस्य व्यक्तित्वं कृतित्वञ्च विस्तरेण वर्णयत।

**अथवा**

ग्रन्थग्रन्थकारयोः परिचयं लिखत।

# A-I/3/2300/21

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ध्यानशतकग्रन्थः केन आचार्येण लिखितः?
2. पठितग्रन्थस्य मङ्गलाचरणं लिखत।
3. ध्यानस्य भेदानां नामानि लिखत।
4. ध्यानस्य लक्षणं किम्?
5. ध्यानस्य फलं किं वर्तते?
6. किं भवति आर्तध्यानात्?
7. रौद्रध्याने लेश्यानां का स्थितिर्भवति?
8. आर्तध्यानं किमर्थं हेयं वर्तते?
9. रौद्रध्यानस्य भेदानां नामानि लिखत।
10. नरकगतेः कारणत्वेन किं ध्यानम् आचार्येण प्रोक्तम्?
11. धर्मध्यानात् परं जीवेन किं कर्तव्यम्?

**अथवा**

लेश्याः कति भवन्ति? नामानि लिखत।

12. दर्शनभावनायाः निरूपणं कुरुत।

**अथवा**

चारित्रभावनां लिखत।

13. कुत्र कथञ्च ध्यानं कर्तव्यम्?

**अथवा**

ध्यानाय किम् आसनम् उपयुक्तं भवति?

14. जीवः संसारसागरात् पारं कथं गन्तुं शक्नोति ?

**अथवा**

व्यवच्छिन्नक्रिया-अप्रतिपातिशुक्लध्यानं किमस्ति ?

15. पठितग्रन्थे मोक्षहेतुत्वेन किम् उक्तम् ?

**अथवा**

ध्यानात् कर्माशयशमनं कथं भवति ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. धर्मध्यानस्य संक्षेपेण स्वरूपं लिखत।

17. आर्तध्यानस्य भेद-प्रभेदसहितं वर्णनं कुरुत।

18. जीवस्य निर्दोषत्वस्य किं ध्यानं कारणम् ? लिखत।

**अथवा**

केभ्यः ध्यानेभ्यः जीवः सदोषः भवति ? स्पष्टयत।

19. रौद्रध्यानस्य जीवे कः प्रभावः भवति ? संक्षेपेण लिखत।

**अथवा**

रौद्रध्यानस्य किं स्वरूपं वर्तते ? वर्णयत।

20. एकस्याः गाथायाः व्याख्यां कुरुत।

(क) थिर-कयजोगाणं पुण मुणीण झाणे सुनिच्चलमणाणं।
गामंमि जणाइण्णे सुण्णे रणो व ण विसेसो॥

**अथवा**

तह सूल-सीसरोगाइवेयणाए विजोगपणिहाणं।
तदसंपओगचिंता तप्पडियाराउलमणस्स॥

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. शुक्लध्यानस्य स्वरूपं विलिख्य तस्य भेद-प्रभेदानपि वर्णयत।

**अथवा**

ध्यानशतकग्रन्थस्य ग्रन्थकारस्य च विस्तरेण वर्णनं कुरुत।

# A-I/4/2301/ 21

## द्वितीयसत्रार्द्धम्

## चतुर्थपत्रम्

## जैनदर्शनम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. चारित्रस्य फलं प्रवचनसारानुसारेण किम् ?
2. ग्रन्थकारः प्रथमगाथायां कस्य तीर्थङ्करस्य स्मरणं करोति ?
3. शुभे परिणतस्य आत्मनः फलं किम् ?
4. अरिहन्तपदस्य प्राप्तिः केन उपयोगेन भवति ?
5. द्रव्यश्रुतस्य प्रवचनसारे किं लक्षणम् ?
6. देवानामपि स्वभावजन्यसुखं कथं नास्ति ?
7. पुण्यं कथं शरीरस्य एव पुष्टिं करोति ?
8. मोहस्य किं स्वरूपम् ?
9. श्रमणस्य लक्षणं ग्रन्थानुसारं लिखत।
10. सरागचारित्रस्य फलं किम् ?
11. किं प्रत्यक्षं ज्ञानम् ?

**अथवा**

क्षायिकज्ञानस्य का परिभाषा ?

12. कः श्रुतकेवली अस्ति ?

**अथवा**

का नाम ज्ञप्तिक्रिया ?

13. 'आदा णाणपमाणं' इत्यनेन किम् अवगम्यते ?

**अथवा**

ज्ञेयार्थपरिणमनक्रिया केवलिनां कथं नास्ति ?

14. व्यवहारधर्मस्य लक्षणं किम् ?

**अथवा**

आत्मा कथं सर्वगतः अस्ति ?

15. शुभोपयोगेन जातं पुण्यं कथं दु:खस्य कारणम् ?

**अथवा**

असद्भूतपर्यायाः ज्ञाने कथं कदा च प्रत्यक्षम् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. श्रुतकेवलि-केवलज्ञानिनो ज्ञाने कथं सादृश्यता वर्तते ? वर्णयत।

17. पुण्यपापयोः कथं भेदः अस्ति ? स्पष्टयत।

18. मोहस्य नाशे जिनोपदेशः कथं कार्यकारी वर्तते ? प्रतिपादयत।

**अथवा**

केवलिनः किमपि परोक्षं कथं नास्ति ? स्पष्टयत।

19. श्रद्धया विना श्रमणः कथं नास्ति ? वर्णयत।

**अथवा**

इन्द्रियाणि विना कथं ज्ञानस्य आनन्दस्य च प्राप्तिः भवति ? निरूपयत।

20. 'चारित्तं खलु धम्मो' इति विशदयत।

**अथवा**

असद्भूताः पर्यायाः ज्ञाने कथं प्रत्यक्षम् ? स्पष्टयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. प्रवचनसारस्य पठितांशस्य सारांशो लेख्यः।

**अथवा**

प्रवचनसारस्य दर्शनजगति योगदानं निरूपयत।

**अथवा**

आचार्यकुन्दकुन्दस्य विस्तरणेन परिचयो देयः।